International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 288-293
© 2021 IJSR
www.anantaajournal.com
Received: 15-10-2020
Accepted: 23-11-2020

**श्यामल शुभा भञ्जः पण्डितः**
पि एइच डि उपाधिप्राप्ता,
पश्चिमवङ्ग, भारत

**Corresponding Author:**
**श्यामल शुभा भञ्जः पण्डितः**
पि एइच डि उपाधिप्राप्ता,
पश्चिमवङ्ग, भारत

# भारवेः काव्यनैपुण्यम् -संक्षिप्तालोचना

**श्यामल शुभा भञ्जः पण्डितः**

**सक्षिप्तसारः**
संस्कृतकाव्यसाहित्यं सुप्राचीनकालात्विकशितं, पत्रपुष्पैः सुशोभितञ्च। कालिदासस्य उत्तरकाले महाकविः भारविः आसीत् सुप्रसिद्धः कविवरः। तस्य काव्यनैपुण्यं पाण्डित्यं वाग्वैद्धञ्च लोकेषु सुप्रसिद्धम्। महाभारतस्य उपाख्यानमाश्रित्य तस्य 'किराताज्र्जुनीयम्' महाकाव्यं काव्यगगने ज्योतिष्कमिव विद्यते। अर्थगौरवसमृद्धं काव्यमिदं नारिकेलवचोसम्मितम्।अस्मिन् प्रवन्धे अहं महाकवेः भारवेः काव्यनैपुण्यं तथा तस्य काव्यगुणकर्त्तनं कर्तुमिच्छामि स्तोकेन।

**कुट शब्द**: संस्कृतकाव्यसाहित्यं, कालिदासस्य उत्तरकाले महाकविः, महाभारतस्य

## भूमिका-

संस्कृतकाव्यसाहितस्य इतिवृत्तं सुप्राचीनम् संस्कृतकाव्यानि वेद-पुराण-रामायण-महाभारतमाश्रित्य पत्रपुष्पैः विकाशिता: भवन्ति। महर्षि वाल्मीकि: क्रौंचविरहं दृष्ट्वा तस्य हृदयेशोकमुभवति। तथा -

"मा निषाद प्रतिष्ठां त्वमगमः शाश्वती समाः।
यत्र क्रौञ्चमिथुनादेकमवधीः काममोहितम्"।।

**तथैव शौकात्-"श्लोकत्वमागतम्"।**

तमसानदीतीरे प्रशान्ततपोवने संस्कृतकावस्य प्रभातकालमेव सूचीतम्।कालक्रमेण राझामाश्रये राजपृष्ठपोषकतयासंस्कृतकाव्यसाहित्यं विकशयति स्म। वर्णाननैपुण्येन अलंकारप्रयोगबैशद्येन काव्यसाहित्यं सुशोभितमिति नास्ति कश्चित् संशयः। महाकविः कालिदासः भारतीयसाहित्यलोके नक्षत्रस्वरूपः। तस्य उत्तरकाले कुमारदासः भारविरिति वहवः कवयःसुप्रसिद्धाः।

परिचयः - लोकेषु प्रसिद्धः कौशिकगोत्रजातस्य नारायणसामिनः पुत्रो एव भारविः कवि। भारवेः पूर्वजाः आनन्दपुरात् नगरात् दक्षिणभारतस्थितं नगरमायाताः। काव्यादर्शः नाम अलंकारग्रन्थे अवन्तिसुन्दरीकथाग्रन्थे तथा कथासारे भारवेः किञ्चित् परिचयमुपलभ्यते। एकदा भारवेः काव्यं श्रुत्वा काञ्चीदेशस्य नृपः सिंहबिष्णुः तं राजीधानीं आनयति स्म।तस्य प्रपौत्रः दण्डीः इति श्रूयते। श्रूयते यत् कविरेवशैव आसीत्। तथा आइहोल शिलालेखे प्राप्यते-
"स विजयतां रविकीर्कविताश्रितकालिदासभारविकीर्ति:" । यथा काशिकावृत्तौ भारवेः काव्यमुदाहरणं प्रदीयते तथा हर्षचरिते भारवेः उल्लेखमुपलभते।तथैव सूच्यते यत् भारविः खलुतस्य काले सुप्रसिद्धःकविवरः नास्ति इत्यस्मिन विषये संशयः ।

**भारवेः काव्यम् ।।**
भारवेः एकमेव महाकाव्यं लभते किरताज्र्जुनीयम् नाम ।अष्टादशसर्गयुक्तंमहाकाव्यमिदं महाभारतस्य वनपर्वमवलम्व्यविरचितम्। द्युतक्रिडायां पराजितो युधिष्ठिरः सपाण्डवः द्वैतवने वसति । स दुर्योधन शासनरूपं ज्ञातुं वनेचरः गुप्तचररूपेण प्रेषितः ।वनेचरः द्वैतवनमागत्य सर्वं निवेदयति। पाञ्चाली पतिं तिरष्कृतवती युद्धाय प्रेरयति। युधिष्ठिरः भीमं दिव्यास्त्रलाभाय प्रेषयति। अर्जुनः हिमालयं प्रविशति यक्षेन सह। इन्द्रकिलपर्वते अर्जुनं परीक्षितुं त्र्यम्बकः किरातवेषेण आगच्छति। तेषां मध्ये युद्धे अर्जुनः पराजितोहपि वीरत्वेन सह प्रयासं करोति।ततः प्रीतः शिवः पाशुपतास्त्रं ददाति तस्मै।

> किराताज्र्जुनीयमेव 'सर्गबन्धोमहाकाव्यमि'त्यनेन स्वार्थकं महाकाव्यम्।
> "सर्गवन्धो महाकाव्यमुच्यते तस्य लक्षणम्।
> आशी नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्।।"इत्यादयः।
> (काव्यादर्शे/प्रथमे अध्याये १४)

यथा काव्येहस्मिन कवेः पाण्डित्यं वाग्वैद्धञ्च प्रस्फुटितम्, तस्य राजनीतिदण्डनीतिश्चेति विषये अपारज्ञानमपि दृश्यते सर्वत्रैव। शरतकालस्य रूपवर्णनं, अप्सरानांजलक्रीडावर्णनं, सायंप्रभातादिवर्णनं तथा युद्धवर्णनावसरे वीररसवर्णनं नास्ति कश्चित् वर्णनकलापक्षे विरामावसरः। टीकाकारः मल्लिनाथः आलोचयति-

> "शृङ्गारादिरसोहङ्गमत्र विजयी वीरः प्रधानो रसः। शैलोद्यानि च वर्णितानि वहुशो दिव्यास्त्रलाभः फलम्।" (किरात/ मल्लिनाथटीका)

किराताज्र्जुनीयम् इति काव्यस्य टीका विंशतिसंख्यकाः टीकाकाराः विरचयन्ति। एतेन कवेः लोकप्रियतामनुभूतं शक्यते ।तेषु मध्ये मल्लिनाथकृतः घन्टापथः प्रसिद्धतमः। चित्रभानुकृतः 'शब्दश्चन्द्रिका" 'सुगवोधिनी' विद्यामाधवकृतः टीका सुप्रसिद्धा।
दण्ड्याचार्यः एवं वदति- "नैसर्गिकी प्रतिभा श्रुतं च वहुनिर्मलम्।अमन्दश्चाभियोहस्याः कारणं काव्यसम्पदः।" (काव्यादर्शः प्रथमपरिच्छेदः)
पुनः यदुक्तं मम्मटेन- "शक्ति निर्पुणता लोकशास्त्र काव्याद्वेक्षणम् काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्ववे।"(काव्यप्रकाश/ प्रथमोल्लासः ३)
पण्डितप्रवरः जगन्नाथः'केवला कविगता प्रतिभा' काव्यकारणमिति मन्यते। वहवः आलंकारिकाः 'दण्डचक्रन्यायेन त्रयो समुदिताः न व्यास्ताः' इत्यनेनविचारयन्ति।यथा अस्मिन काव्ये कवेः पाण्डित्यंराजनीतिज्ञानञ्च दृश्यते तथैव शरद्वर्णनं-हिमालयवर्णनं-गन्धर्वाप्सरानांप्रमोदवर्णनं-उद्याने जलक्रीडा अपि वर्णिता । कविः वर्णनविषये न कचित् कार्पण्यं करोति।शिवार्जुनयोः युद्धवर्णनाकाले वीररसस्य प्रावल्यलमपि परिलक्षितम्। अष्टम-नवम-दशमसर्गेषु वर्णना गुरुभारेन समासिता।वहवः पण्डिताः इयं वर्णना अनर्थका इत्युच्यन्ति।
प्रत्येकस्य कवेःभवति कापि स्वकीयता। तस्यरचनाशैली आंगलभाषया स्टाइल इत्युच्यते ।

यथा उपमा कालिदासस्य इति लोके प्रसिद्धम्।तथा भारवेः कवेरर्थगौरवमेव सर्वलोकविदितः नास्ति इत्यत्र संशयावसरः।

**तथा एवं वदति-**

"उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयोगुणाः।।"

कालिदासस्य उपमाप्रयोगनैपुण्यं लोकप्रसिद्धम्। तथा भारवेः कवेरर्थगौरवम्। सुदीर्घं भावमपि अर्थगौरवमाशयमनायासेन स्वल्पेनैव समासति।भारवेः कवेः काव्ये नासीत् कालिदासस्य पदलालित्यं, माधुर्यम्।वीररसाश्रितेकाव्येहस्मिन अर्थगाम्भीर्यस्यतथा काव्यसौन्दर्यस्य मेलवन्धनं परिदृश्यते। उच्यते यत् भावाश्रयी भाषा एव सर्वदा काङ्खिता। ततः काव्येहस्मिन माधुर्यप्रौडगुणस्य समन्वयः दृश्यते ।

**स स्वयमेव कथयति-**

"अकृत्रिमप्रेमरसाभिरामं रामार्पितं दृष्टिविलोभि दृष्टम्।
मनः प्रसादाञ्जलिना निकामं जग्राह पाथेयमिवेन्द्रसूनुः।।" (किरात/३।२७) ।

तस्य किले व्याकरणशास्त्रस्य विस्तारहेतुः शब्दार्थयोः समानं प्राधान्यं सूच्यते। व्यञ्जनध्वनिः अत्र उपेक्षिता।
लघुचपलभाषया, छन्दसा वा गुरुगम्भीरविषयवर्णनं न यथोपयुक्तम्। तथा भारविः तस्य काव्ये माधुर्यं परित्यज्य ओजःपूर्णं गौडीरीतिमवलम्वयति। वीररसाश्रिते काव्ये इयं भाषा यथोपयुक्ता, समीचीना। कलापक्षप्रधानां रचनारीतिं प्रवर्तितं भारविना। उत्तरकाले भट्टि-माघ-श्रीहर्षादिभिः तमनुसरणं कृतम्।

उक्तं च कविना - "सुदुलभा सर्वमनोरमाः गिरः"। तथा "हितं मनोहारि च दुलर्भं वचः"। (किरात १/४)

**उच्यते पुनः -**

"सत्यं व्रूयात प्रियं व्रूयात न व्रूयात सत्यमप्रियम्।
प्रियं च नानृतं व्रूयाद् एष धर्मः सनातनः"(किरात)

अतः महाकविना उक्तं - "समुन्नयन् भूतिमनार्यसंगमाद् वरं विरोधोहपि समं महात्मभिः" (किरात १/८)
न हि गुणार्जनं सुदुलर्भम्। - "सुलभा रम्यता लोके दुलर्भं हि गुणार्ज्जनम्।" (किरात)
"आपातरम्याः विषयाः पर्यन्त परितापिनः" (किरात)
मानहीनस्य पुरुषस्य निरर्थकं जीवनम्।-"जन्मिनो मानहीनस्य तृणस्य च समागतिः"। (किरात)
परिलक्षितं यत् भारविः यथा वाहुल्येननिसर्गवर्णनं करोति स्म तथैव शाष्त्रज्ञानस्य प्रकाशमपि तस्य काव्ये परिदृश्ते।

**यथा-**

"व्रजन्ति ते मूढधियः पराभवं मायाविषु ये न मायिनः।(किरात १।४२)
"स सन्ततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु वन्धुताम्।" (किरात)

कालिदासस्य उत्तरकाले काव्यानि खलु वर्नणवाहुल्यान्वितानि समासनिगडितानि उपलभ्यते। अस्मिन महाकाव्ये भारवेः कवेः पाण्डित्यं तस्य वाग्वैद्धञ्च प्रस्फुटितम्। महाकाव्येहस्मिन् द्वितीये सर्गे युधिष्ठिरेण यदुक्तम्।-

"स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्।
रचितानां पृथगर्थता गिरां न च सामर्थमपोहितं क्वचित्" (किरात २/२३)

इति वाक्यं स्वयं भारवेः काव्यविषये प्रयुञ्जते। महाकविना यत्र अवकाशः प्राप्तः तत्रैव नीतिवाक्यमुपन्यस्ता। भारवेः रचितानां श्लोकानां वहिरावरणं कर्कशं नीतिसारगर्भमपि तु अन्तः सरसं सारवत्तरम्। कठिनावरणमयेषु श्लोकेषु सुमधुरोहर्थः उपलभ्यते। तेन टीकाकारेण मल्लिनाथेन उक्तञ्च- "नारिकेलफलसम्मितं वचो भारवेः संपदा तद् विभज्यते।

स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिकाः यथेप्सितम्।।

**"रिति।**

पुनः तस्य टीकायां प्रारम्भे मल्लिनाथेन उक्तम्-
"नानानिवन्ध विषमैकपदैर्नितान्तं
सशंङ्क चङक्रमणखिन्न-धियाम् अशङ्कम्"
दुर्गममिदं काव्यं दुर्गमाः अस्य व्याखाः। तेषु घन्टापथः सरलतमः नास्ति इत्यत्र संशयावसरः।

भारवेः वाक्यं खलुकचित् सालंकारं,कचित्तु निरावरणम्। काव्यमेव अर्थभूयिष्ठम्।कविः आसीत् शास्रज्ञः, राजनीतिदण्डनीतिविषये पारङ्गमस्तथा। उक्तं चअर्जुनेन किराताज्जुनीरमिति महाकाव्ये -

"प्रसादरम्ममोस्वि गरीयो लाघवान्वितम्।
साकाङ्खमनुपस्कारं विष्वगति निराकलुम्।
न्यायनिर्णीतसारत्वान् निरपेक्षमिवागमे
अप्रकम्प्यतयान्येषाम् आम्नायवचनोपमम्।
अलङ्घ्यत्वाज्जशैरनैः क्षुभितोदन्वदुर्जितम्।
औदार्यादर्थसम्पत्तेः शान्तं चित्तमृषेरिव।।" (किरात११।३८-४०)

वाक्यानि इमानि न केवलं इन्द्रमुद्दिश्य प्रयुक्तम्, इमानि एव भारवेः कवेः काव्यवैशिष्टमिति अनुभूयते।

तथोक्तञ्च साहित्यदर्पणकारेण'-

"सवासनानां सभ्यानां रसस्यास्वादनं भवेत्।
निर्वासनाः शाब्दिकाद्याः
काष्ठलोहाष्ट्राश्मसन्निभाः"।।

रसाज्ञानां पुरुषाणां रसस्वादो जाता, न तु इतराणाम्। यथा उदाहरणमेकम्।

"कथाप्रसंगेन जनैरुदाहृता
दनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद् व्यथते नताननः
सुदुःसहान्मन्त्रपदाद् इवोरगः।।" (किरात १/२४)

वासुकिनामसहिते मन्त्रजाते उच्चारितेयथासर्पः बिष्णुवाहनं गढुरं स्मृत्वा नताननः कष्टं लभते तथैव दुर्योधनोहपि युधिष्ठिरस्य नाम श्रवणेन।अस्य श्लोकस्य वहिरावरणं नीरसंकिन्तुअन्तरभागेसुमधुरः सरसार्थः विद्यते। अत्र श्लिष्टोपमा नाम अलंकारः। ततः प्रथमसर्गस्य अपरः श्लोकः-

"अमर्षशून्येन जनस्य जन्तुना
न जातहार्देन न विद्विषादरः"।।(किरात १/३३)

अत्र आदरशब्दं दरशब्दं च प्रयुक्तं मन्यमानाः जातहार्हेन इत्यनेन आदरशब्दं विद्विषा इत्यनेन भयार्थं दरशब्दं योजयन्ति। भारवेः कवेः काव्यशैली उजः गुनान्विता।

**किराताज्र्जुनीयमिति महाकाव्ये अर्थगौरवयुक्तानि वाक्यानि-**

"अतिवीर्यतीव भेषजे वहुरल्पीयसि दृश्यते गुण"(किरात•२।४)
"नियता लघुता निरायतेव गरीयान् न पदं नृपश्रियः"(किरात २।४)
"निवसन्ति पराक्रमाश्रया ना विषादेन समं समृद्धयः।"(किरात २।१५)

"लघयन् खलु तेजसा जगत् न महानिच्छति भूतिमन्यतः"(किरात २।१८)
"वामशीला हि जन्तवः"(किरात ११।२४)
"विपदन्ता हि अविनीतसम्पदः" (किरात२।५२)

**काव्यस्यास्य अधिकांशभागः सूक्तिमयः।यथा-**

"हितं मनोहारिच दुर्लभं वचः।"(किरात १।)
"प्रकर्षतन्त्रा हिरणे जयश्री।"(किरात ३।१७)
"अविवेकः परमपदां पदम्"

भारवेः काव्यमपि हितं चापि मनोरमम्। लोके यथार्थं यत् दुर्लभं हितमपि प्रियवाक्यम्। ततः 'नारिकेलफलसम्मितं' इति।
भारविः शव्दाणामाश्रित्य विलसति ।

**यथा-**

"न नोननुन्नो नुन्ननो नाना नानानना ननु।
नुन्नोहनुन्नो ननुन्नेनो नानेनानुन्ननुन्ननुत्" (किरात १५/१४)

**तथैव-**

"ससासिः सासुसू सासो येया येया ययाययः।
ललौ लीलां ललोहलोहः शशीशशिशुशी शशन्।" (किरात १५|४)

**पुनः-**

"चारचञ्चुश्चिरारेची चञ्चच्चीररूचारुचः।
चचार रूचिरश्चारू चारराचारचञ्चुरः।।"(किरात १५/३८)
भारवेः कविता तथा चित्रकाव्याणां प्रारम्भमेव इतुच्यते।

शब्दचातुर्य्यमिदं न सर्वदा अपेक्षितम्। कृत्रिमतादोषेन दुष्टः इति केचित् पण्डिताः वदन्ति।

यथा हि "सञ्चारिणी दीपशिखेव रात्रौ" इत्युच्चारणेन महाकवेः कालिदासस्य नाम स्मरणमायाति, घण्टामाघः इति श्रुत्वा कवेः माघस्य तथा आतपत्रभारविरिति सूच्यते इत्यनेन श्लोकेन-

"उत्फुल्लस्थलनलिनीवनादमुष्मादुदभूतः
सरसिजसम्भवः परागः।
वात्याभिर्वियति विवर्तितः समन्तादाधत्ते
कनकमयातपत्रलक्ष्मीम्।" (किरात ५।३९)

यद्यपि भारवेः रचना व्याकरणप्रमादरहिता तथापि एवमुच्यते-"अपशब्दं शतं माघे भारवौ तु शतत्रयम्।"संस्कृतसाहित्यस्य काव्यगगने भारविःनक्षत्रस्वरूपः।तथापि कविः खेदयति-

"स्तुर्वन्ति गुर्वीमभिधेयं सम्पदम्।
विशुद्धि मुक्तेरपरे विपश्चितः।
इति स्तितायां प्रतिपुरुषं रुचौ।
सुदुर्लभा सर्वमनोरमाः गिरः" (किरात१४।५)

महाकवेः कालिदासस्य उत्तरकाले भारविः कविः रविरिव विभाति काव्यालोके। उच्यते यत्-

"तावद् भारवेर्भाति यावन्माघस्य नोदयः।
उदिते च पुनर्माघे भारवेर्भाति रवेरिव।।"

**परिशेषः-**

काव्यविछारसमये कवयः रचनाकालमेव गुरुत्वेन सह विचार्यताम्। कालिदासस्य उत्तरकाले काव्यभावापेक्षया वर्णननैपुण्यं, पाण्डित्यं, व्याकरणज्ञानवैद्धग्धं काव्यालंकारशास्त्रज्ञानस्य प्रयोगपारिपाट्यं खलु अधिकं गुरुत्वं लभते।भारविः नास्य व्यातिक्रमः।कालिदासोत्तरकाले भारवेः काव्यनैपुण्यम् न कोहपि अस्वीकर्तुं शक्यते।यद्यपिअलंकारभारेण निगडितः, चित्रत्वेन, दुरूह शब्देन, काव्यस्य स्वाभाविकसौन्दर्यं व्यहतं दृश्यते। तथापि

काव्यसास्य कठिनवहिरावरणस्य अन्तर्भागे सरसं काव्यस्रोतं प्रवहति नास्ति कश्चित् संशयावसरः।

**ग्रन्थसूची-**


1. दाहालः, आचार्यःलोकमणि/संस्कृत साहित्येतिहासः।
2. कृष्णदास अकेडेमी, वाराणसी, द्वितीय संस्करण २०५६ आइ -एस-वि-एन ८१-२१८-००२८-५।
3. वसु, अनिल चन्द्र = किराताज्र्जुनीयम् । प्रथमः सर्गः। संस्कृत वुक डिपो।प्रथमः प्रकाशः सेप्टेम्वर १९९९।
4. वन्द्योपाध्याय धीरेन्द्रनाथ। संस्कृत साहित्येर इतिहास। पश्चिमवङ्ग राज्य पुस्तक पर्षद। द्वितीय संस्करण २००५।
5. आइ-एस-वि-एन ८१-२४७-०५८६-०।
6. काव्यादर्श। दण्डीप्रणीतम् । प्रथमपरिच्छेदः। अनिल चन्द्र वसु। संस्कृत वुक डिपो। पुनर्मुद्रणः २००८।
7. काव्यप्रकाश। मम्मटप्रणीतम्।डः रामानन्द आचार्य। संस्कृत पुस्तक भाण्डार। द्वितीय संस्करण १४०४।